# Brahmaproktam Suryasya Ekavimshatinama Stotram

# ब्रह्मप्रोक्तं सूर्यस्य एकविंशतिनामस्तोत्रम्

## Document Information

Text title : Brahmaproktam Suryasya Ekavimshatinama Stotram

File name : brahmaproktaMsUryasyaekaviMshatinAmastotram.itx

Category : navagraha, brahmapurANa, stotra, viMshati

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 31/31-38||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2024

*sanskritdocuments.org*

# ब्रह्मप्रोक्तं सूर्यस्य एकविंशतिनामस्तोत्रम्

ब्रह्मोवाच ।
शृणुध्वं मुनिशार्दूलाः सारभूतं सनातनम् ।
अलं नामसहस्रेण पठन्नेवं स्तवं शुभम् ॥ २९॥

यानि नामानि गुह्यानि पवित्राणि शुभानि च ।
तानि वः कीर्त्तयिष्यामि श्रृणुध्वं भारस्करस्य वै ॥ ३०॥

विकर्त्तनो विवस्वांश्च मार्त्तण्डो भास्करो रविः ।
लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्महेश्वरः ॥ ३१॥

लोकसाक्षी त्रिलोकेशः कर्त्ता हर्त्ता तमिस्रहा ।
तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ ३२॥

गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ।
एकविंशतिरित्येष स्तव इष्टः सदा रवेः ॥ ३३॥

शरीरारोग्यदश्चैव धनवृद्धियशस्करः ।
स्तवराज इति ख्यातिस्त्रिषु लोकेषु विश्रुतः ॥ ३४॥

य एतेन द्विजश्रेष्ठा द्विसन्ध्येऽस्तमनोदये ।
स्तौति सूर्यं शुचिर्भूत्वा सर्वपापैः प्रमुच्यते ॥ ३५॥

मानसं वाचिकं वापि देहजं कर्मजं तथा ।
एकजप्येन तत्सर्वं नश्यत्यर्कस्य सन्निधौ ॥ ३६॥

एकजप्यश्च होमश्च सन्ध्योपासनमेव च ।
धूपमन्त्रार्घ्यमन्त्रश्च बलिमन्त्रस्तथैव च ॥ ३७॥

अन्नप्रदाने दाने च प्रणिपाते प्रदक्षिणे ।
पूजितोऽयं महामन्त्रः सर्वपापहरः शुभः ॥ ३८॥

तस्माद्यूयं प्रयत्नेन स्तवेनानेन वै द्विजाः ।

स्तुवीध्वं वरदं देवं सर्वकामफलप्रदम् ॥ ३९॥

इति ब्रह्मपुराणे एकत्रिंशाध्यायान्तर्गतं
ब्रह्मप्रोक्तं एकविंशतिनामसूर्यस्तोत्रं समाप्तम् ।

ब्रह्मपुराण । अध्याय ३१/३१-३८॥

brahmapurANa . adhyAya 31/31-38..

Proofread by PSA Easwaran

*Brahmaproktam Suryasya Ekavimshatinama Stotram*

pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*